श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

# श्री स्तुतिः

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि ॥

मानातीत प्रथित विभवां मङ्गलं मङ्गलानां
वक्षः पीठीं मधु विजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानु श्रविक महिम प्रार्थिनीनां प्रजानां
श्रेयो मूर्तिं श्रियम् अशरणस् त्वां शरण्यां प्रपद्ये ॥ १ ॥

आविर्भावः कलश जलधा वध्वरे वाऽपि यस्याः
स्थानं यस्याः सरसिज वनं विष्णु वक्षः स्थलं वा ।
भूमा यस्या भुवनम् अखिलं देवि दिव्यं पदं वा
स्तोक प्रज्ञैर् अनवधि गुणा स्तूयसे सा कथं त्वम् ॥ २ ॥

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वाम् अनितर गतिः स्तोतुमाशं समानः ।
सिद्धारम्भः सकल भुवन श्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ३ ॥

यत् सङ्कल्पाद् भवति कमले यत्र देहिन्य मीषां
जन्म स्थेम प्रलय रचना जङ्गमा जङ्गमानाम् ।



rmvenkat@yahoo.com

तत् कल्याणं किमपि यमिनाम् एक लक्ष्यं समाधौ
पूर्णं तेजः स्फुरति भवती पाद लाक्षा रसाङ्कम्॥ ४॥

निष्प्रत्यूह प्रणय घटितं देवि नित्यान पायं
विष्णुस्त्वं चेत्यनवधि गुणं द्वन्द्व मन्योन्य लक्ष्यम्।
शेषश्चित्तं विमल मनसां मौलयश्च श्रुतीनां
संपद्यन्ते विहरण विधौ यस्य शय्या विशेषाः॥ ५॥

उद्देश्यत्वं जननि भजतोर् उज्झितोपाधि गन्धं
प्रत्यग्रूपे हविषि युवयोर् एक शेषित्व योगात्।
पद्मे पत्युस् तव च निगमैर् नित्यमन् विष्यमाणो
नावच्छेदं भजति महिमा नर्तयन् मानसं नः॥ ६॥

पश्यन्तीषु श्रुतिषु परितः सूरि बृन्देन सार्धं
मध्ये कृत्य त्रिगुण फलकं निर्मित स्थान भेदम्।
विश्वाधीश प्रणयिनि सदा विभ्रम द्यूत वृत्तौ
ब्रह्मे शाद्या दधति युवयोर् अक्ष शार प्रचारम्॥ ७॥

अस्ये शाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधि तनया विष्णु पत्नीन्दिरेति।
यन्नामानि श्रुति परिपणान् एवमावर्तयन्तो
नावर्तन्ते दुरित पवन प्रेरिते जन्म चक्रे॥ ८॥

त्वामे वाहुः कतिचि दपरे त्वत्प्रियं लोकनाथं
किं तैरन्तः कलह मलिनैः किंचि दुत्तीर्य मैः।
त्वत् संप्रीत्यै विहरति हरौ संमुखीनां श्रुतीनां
भावा रूढौ भगवति युवां दम्पती दैवतं नः॥ ९॥

आपन्नार्ति प्रशमन विधौ बद्ध दीक्षस्य विष्णोः
आचख्युस् त्वां प्रिय सहचरीम् ऐकमत् योपपन्नाम्।
प्रादुर् भावैरपि सम तनुः प्राध्वमन् वीयसे त्वं
दूरोत्क्षिप्तैर् इव मधुरता दुग्धरा शेस्तरङ्गैः॥ १०॥

धत्ते शोभां हरि मरकते तावकी मूर्तिराद्या
तन्वी तुङ्ग स्तन भर नता तप्त जाम्बू नदाभा।
यस्यां गच्छन्त् युदय विलयैर् नित्य मानन्द सिन्धौ
इच्छा वेगोल्लसित लहरी विभ्रमं व्यक्तयस्ते॥ ११॥

आसंसारं विततमखिलं वाङ्मयं यद्विभूतिः
यद् भ्रू भङ्गात् कुसुम धनुषः किङ्करो मेरु धन्वा।
यस्यां नित्यं नयन शतकैर् एक लक्ष्यो महेन्द्रः
पद्मे तासां परिणति रसौ भाव लेशैस् त्वदीयैः॥ १२॥

अग्रे भर्तुः सरसिज मये भद्र पीठे निषण्णाम्
अम्भो राशेर् अधिगत सुधा संप्लवादुत्थितां त्वाम्।
पुष्पा सार स्थगित भुवनैः पुष्कला वर्त काद्यैः
क्लृप्तारम्भाः कनक कलशैर् अभ्यषिञ्चन् गजेन्द्राः॥ १३॥

आलोक्य त्वाम् अमृत सहजे विष्णु वक्षःस्थलस्थां
शापाक्रान्ताः शरणमगमन् सावरोधाः सुरेन्द्राः।
लब्ध्वा भूयस् त्रिभुवनमिदं लक्षितं त्वत् कटाक्षैः
सर्वाकार स्थिर समुदयां संपदं निर्विशन्ति॥ १४॥

आर्त त्राण व्रतिभिर् अमृता सार नीलाम्बुवाहैः
अम्भोजानाम् उषसि मिषताम् अन्तरङ्गैर् अपाङ्गैः।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस् त्वदीया

तस्यां तस्याम् अहम् अहमिकां तन्वते संपदोघाः ॥ १५ ॥

योगारम्भ त्वरित मनसो युष्मदै कान्त्य युक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायाम् ।
तेषां भूमेर् धनपति गृहाद् अम्बरादम्बुधेर्वा
धारा निर्यान्त् यधिक मधिकं वाञ्छितानां वसूनाम् ॥ १६ ॥

श्रेयस् कामाः कमल निलये चित्र माम्नाय वाचां
चूडा पीडं तव पद युगं चेतसा धारयन्तः ।
छत्र च्छाया सुभग शिरसश् चामर स्मेर पार्श्वाः
श्लाघा शब्द श्रवण मुदिताः स्त्रग्विणः सञ्चरन्ति ॥ १७ ॥

ऊरीकर्तुं कुशलम् अखिलं जेतुमादीनरातीन्
दूरी कर्तुं दुरित निवहं त्यक्तुम् आद्याम विद्याम् ।
अम्ब स्तम्ब अवधिक जनन ग्राम सीमान्त रेखाम्
आलम्बन्ते विमल मनसो विष्णु कान्ते दयां ते ॥ १८ ॥

जाता काङ्क्षा जननि युवयोर् एक सेवाधि कारे
माया लीढं विभवम् अखिलं मन्य मानास् तृणाय ।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गः प्रशमन फलं वैदिकं धर्मसेतुम् ॥ १९ ॥

सेवे देवि त्रिदश महिला मौलि मालार्चितं ते
सिद्धि क्षेत्रं शमित विपदां संपदां पाद पद्मम् ।
यस्मिन् नीषन् नमित शिरसो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २० ॥

सानुप्रास प्रकटित दयैः सान्द्र वात्सल्य दिग्धैः

अम्ब स्निग्धैर् अमृत लहरी लब्ध स ब्रह्मचर्यैः।
घर्मे ताप त्र्य विरचिते गाढ तप्तं क्षणं माम्
आकिञ्चन्य ग्लपित मनघैर् आर्द्रयेथाः कटाक्षैः॥ २१॥

संपद्यन्ते भव भय तमी भानवस् त्वत् प्रसादात्
भावाः सर्वे भगवति हरौ भक्ति मुद्वेलयन्तः।
याचे किं त्वाम् अहमिह यतः शीतलोदार शीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान्॥ २२॥

माता देवि त्वमसि भगवान् वासुदेवः पिता मे
जातः सोऽहं जननि युवयोर् एक लक्ष्यं दयायाः।
दत्तो युष्मत् परि जन तया देशिकैर् अप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेर वक्त्रा विभासि॥ २३॥

कल्याणानाम् अविकल निधिः काऽपि कारुण्य सीमा
नित्यामोदा निगम वचसां मौलि मन्दार माला।
संपद् दिव्या मधु विजयिनः सन्निधत्तां सदा मे
सैषा देवी सकल भुवन प्रार्थना कामधेनुः॥ २४॥

उपचित गुरु भक्तेर् उत्थितं वेङ्कटेशात्
कलि कलुष निवृत्त्यै कल्पमानं प्रजानाम्।
सरसिज निलयायाः स्तोत्रम् एतत् पठन्तः
सकल कुशल सीमाः सार्व भौमा भवन्ति॥ २५॥

कवितार्किक सिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

---



rmvenkat@yahoo.com